**चतुर्थचरणम्, कार्यक्रमः 04**

**त्रिदिवसीय-ऑनलाइन-राष्ट्रिय-कार्यशाला**

# निर्माणप्रबन्धनयोः ऑनलाइनशिक्षणम्

**(Creating and Managing : Online Teaching)**

18-20 जून 2020 पर्यन्तम्

**संक्षिप्तप्रतिवेदनम्**

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य बहुआयामिपरियोजना- **पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षण-मिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शिक्षणाधिगमकेन्द्रेण** चतुर्थचरणस्य कार्यक्रमाणाम् **'निर्माणप्रबन्धनयोः ऑनलाइन शिक्षणम्'** इति विषये चतुर्थ-त्रिदिवसीयराष्ट्रियकार्यशालायाः आयोजनम् 2021 तमवर्षस्य जूनमासस्य अष्टादशदिनाङ्कात् जूनमासस्य विंशतितमदिनाङ्कं यावत् कृतम्। कार्यशालायाः मुख्योद्देश्यं प्रतिभागिनां साक्षात् (लाइव) कक्षाशिक्षणाय विविध-ऑनलाइनमञ्चानां माध्यमेन अवबोधः विविध-अधिगमप्रबन्धप्रणालीनां (LMSs) माध्यमेन ऑनलाइनशिक्षणस्य निर्माणप्रबन्धनयोः सम्बद्धकुशलतानां विकासः च करणीयः। ऑनलाइनकार्यशालायाः सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्रस्य शुभारम्भः शिक्षणाधिगमकेन्द्रस्य परियोजनाध्यक्षया **प्रो. अमितापाण्डेयभारद्वाजमहोदयया** स्वागतभाषणं कार्यशालायाः सन्दर्भैः च कृतम्। तदनु **डॉ. अनिलदत्तात्रेयसहस्रबुद्धेवर्याणां** (निदेशकः, अखिलभारतीयतकनीकीशिक्षापरिषद्, नवदेहली) मुख्यातिथीनां सम्बोधनम्, अध्यक्षीयभाषणं श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालस्य माननीयानां कुलपतीनां **प्रो. रमेशकुमारपाण्डेयवर्याणां** च जातम्। **प्रो. के. भरतभूषणवर्येण** (शिक्षासङ्कायप्रमुखः विभागाध्यक्षश्च) धन्यवादज्ञापनेन विहितम्। कार्यशालायाः क्रियान्वयनं विशेषरूपेण अभिकल्पितेषु 21 सत्रेषु कृतम्, तेषु उद्घाटन-प्रबोधन-अष्टप्रदर्शनाधारिततकनीकी-प्रश्नोत्तरसत्रम्, त्रीणि स्वाभ्यास- ऑनलाइन-आकलन-प्रतिपुष्टि-अनुभवकथनसमापनादीनि सत्राणि जातानि। अन्तिमतिथिपर्यन्तं 933 प्रतिभागिनां पञ्जीकरणं प्राप्तम्, तेषु 327 कार्यशालायाम् आमन्त्रिताः, तथैव 251 प्रतिभागिभिः स्वीयं प्रतिभागस्य प्रतिपुष्टिः प्रदत्ता, परञ्च 230 **प्रतिभागिभिः** कार्यशाला कृता, 21 प्रतिभागिनः व्यक्तिगतकारणेन प्रतिभागं कर्तुं न शक्तवन्तः। 230 प्रतिभागिषु 229 भारतस्य 20 राज्येभ्यः 02 केन्द्रशासितप्रदेशेभ्यः तथा च 01 प्रतिभागी सऊदी-अरबतः आसीत्। 20 राज्येभ्यः प्रतिभागिनाम् आन्ध्रप्रदेशतः 10, असामतः 01, बिहारतः 05, छत्तीसगढ़तः 01, हरियाणातः 22, हिमाचलतः 04, झारखण्डतः 04, कर्नाटकतः 11, केरलतः 02, मध्यप्रदेशतः 03, महाराष्ट्रतः 30, ओडिशातः 05, पंजाबतः 03, राजस्थानतः 16, तमिलनाडुतः 09, तेलंगानातः 01, त्रिपुरातः 04, उत्तराखण्डतः 02, उत्तरप्रदेशतः 28, पश्चिमबंगालतः 08, जम्मूकश्मीरतः 02, देहलीतः 58 च प्रतिभागिनः आसन्। कार्यशालाविषये निष्णातानां देशस्य प्रतिष्ठितसंस्थानानां **चतुर्णां विशेषज्ञानां** कुशलमार्गदर्शनं जातम्। एतेषु सत्रेषु कार्यशालायाः मुख्यविषयाः आसन् ते यथा- ऑनलाइनशिक्षणस्य विहंगावलोकनम्, अधिगमप्रबन्धनप्रणाली (LMSs)-एडमोडो-मूडलस-गूगलक्लासरूम, ऑनलाइनकोर्स-अभिकल्पन एवं शिक्षणाधिगमाय गूगलटूल्स इत्यस्य प्रयोगः च। तकनीकीसत्राणां विषयेषु 04 **दत्तकार्याणि** प्रतिभागिनां प्रदत्तानि। विशिष्टसत्रे विश्वविद्यालयानुदानाऽऽयोगस्य अध्यक्षेण ऑनलाइनसम्बोधने परियोजनाध्यक्षया अतिथीनाम् स्वागतानन्तरं सारस्वतातिथीनां सम्बोधनं **डॉ. गणेश ए. हेगडेमहोदयानां** (सलाहकारः, राष्ट्रियप्रत्यायनमूल्याङ्कनपरिषद्, बेंग्लूरु, कर्नाटकः) च जातम्। तदनु मुख्यातिथीनां **प्रो. धीरेन्द्रपालसिंहवर्याणां** (अध्यक्षः, विश्वविद्यालयानुदानाऽऽयोगः, नवदेहली) सम्बोधनं वीडियोसन्देशमाध्यमेन प्रसारितं, ततः परम् अध्यक्षीय-उद्बोधनम् विश्वविद्यालयस्य माननीयैः कुलपतिभिः अतिथीनां धन्यवादज्ञापनं च कृतम्। अस्य सत्रस्य लाइव साक्षात् प्रसारणं विश्वविद्यालयस्य अकादमिकफेसबुकमिति पृष्ठे जातम्। जूनमासस्य त्रयोविंशतितमदिनाङ्कपर्यन्तम् आहत्यदर्शकानां सङ्ख्या 441 आसीत्। ऑनलाइनपरीक्षणम् अपि प्रशासितम्, तेषु 63% प्रतिभागिनः 60 **प्रतिशतात्** अधिकान् अङ्कान् लब्धवन्तः। अन्ते विशेषज्ञानां प्रस्तुतव्याख्यानानां गुणवत्ताविषये ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु कृता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकं** च प्राप्तम्। तथा च तेषां औसतम् 78% 19% 03% **एवं** 00% क्रमशः श्रेणीषु प्राप्तम्। अनेन साकं कार्यशालायाः सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्ता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं** च। एतेषां 10 बिन्दूनां प्राप्तश्रेण्याम् औसतप्रतिशते 75% **उत्कृष्टम्**, 22% **अति-उत्तमम्**, 03% **उत्तमम्**, 00% **संतोषजनकं** च प्राप्तम्। समापनसत्रे परियोजनाध्यक्षया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तदनु **पद्मश्रीचमूकृष्णशास्त्रीमहोदयानां** (सचिवः, संस्कृतसंवर्धप्रतिष्ठानम्, नवदेहली) मुख्यातिथीनां सम्बोधनम् अध्यक्षीयभाषणं माननीयानां **प्रो. रमेशकुमारपाण्डेयवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली) च जातम्। शिक्षासङ्कायप्रमुखस्य धन्यवादज्ञापनेन कार्यशाला सम्पन्नतां गता। कार्यशालायाः समापनान्तरं सफलप्रतिभागिनां ई-चित्रावली ई-प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।